http://www.sgbauonline.com/



# M.A. Part–I (Semester–I) Examination
## SANSKRIT
## Paper—2
## (Grammar & Linguistics)

Time : Three Hours] [Maximum Marks : 80

सूचना :— निर्देशाभावे स्वीकृतमाध्यमेनैव उत्तराणि लिखतु।

1. (अ) कयोः **द्वयोः** सूत्रयोः सोदाहरणं स्पष्टीकरणं कुरुत :— 10

(i) संबोधने च

(ii) अधिपरी अनर्थकौ

(iii) संज्ञोऽन्यतरस्यां कर्मणि

(iv) तुमर्थाच्च भाववचनात्।

(ब) कयोः **द्वयोः** ससूत्रस्पष्टीकरणं कुरुत :— 6

(i) गेहं प्रविशति

(ii) उप हरिं सुराः

(iii) दानीयो विप्रः

(iv) हरये नमः

2. (अ) कयोः **द्वयोः** सूत्रयोः सोदाहरणं स्पष्टीकरणं कुरुत :— 10

(i) अपादाने पञ्चमी

(ii) षष्ठी शेषे

(iii) कर्तृकर्मणोः कृति

(iv) यस्य च भावेन भावलक्षणम्।

(ब) कयोः **द्वयोः** ससूत्रयोः स्पष्टीकरणं कुरुत :— 6

(i) शत्रून् पराजयते।

(ii) ग्रामस्य दक्षिणतः।

(iii) व्रजं गामी।

(iv) पुष्ये शनिः।

3. (अ) **एकस्य** प्रश्नस्य उत्तरं सविस्तरं लिखतु :— 10

(i) भाषा नाम किम् ? भाषायाः व्याख्यां दत्त्वा सविस्तरं स्पष्टीकरणं करोतु।

(ii) आकृतिमूलकवर्गीकरणस्य स्पष्टीकरणं करोतु।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(ब) कयोः द्वयोरुपरि टिप्पणी लिखत् :— 6

(i) अमेरिका परिवारः

(ii) सेमेटिक परिवारः ।

(iii) अयोगात्मक भाषा ।

(iv) पूर्ण प्रश्लिष्ट योगात्मक भाषा ।

4. (अ) एकस्य प्रश्नस्योत्तर सविस्तरं लिखत् : 10

(i) ध्वन्योच्चार स्थानानां सविस्तरं स्पष्टीकरण कुरुत ।

(ii) ध्वनिपरिवर्तनस्य कारणानि स्पष्टी कुरुत ।

(ब) कयोः द्वयोरुपरि टिप्पणी लिखत् :— 6

(i) मानस्वरः ।

(ii) बलाघातस्यप्रभावः ।

(iii) याकोब ग्रीमस्य नियमः ।

(iv) वर्नरस्य नियमः ।

5. उचितम् उत्तरं चिनुत (केऽपि षोडश) :— 16

(1) सर्पिषः ज्ञानम् अत्र षष्ठी केन सूत्रेण भवति ?

(अ) ज्ञोऽविदर्थस्य करणे (ब) एनपा द्वितीया

(क) षष्ठ्यतसर्थप्रत्ययेन (ड) षष्ठी हेतुप्रयोगे ।

(2) मूलेन आवहयेत् देवीम् इत्यत्र केन सूत्रेण तृतीया ?

(अ) कर्तृकरणयोस्तृतीया (ब) साधकतमं करणम्

(क) नक्षत्रे च लुपि (ड) येनाङ्गविकारः

(3) अधिशेते वैकुण्ठं हरिः । इत्यत्र वैकुण्ठशब्दे कर्मसंज्ञा केन सूत्रेण भवति ?

(अ) उपान्वध्याङ्वसः (ब) अकथितं च

(क) अभिनिविशश्च (ड) अधिशीङ्स्थाऽऽसां कर्म

(4) 'नदीमन्ववसिता सेना' । इत्यत्र 'अनु' कस्मिन् अर्थे कर्मप्रवचनीयसंज्ञकः ?

(अ) पूजायाम् (ब) हीने

(क) तृतीयार्थे (ड) उपोऽधिके च

(5) पित्रा संजानीते । इत्यत्र केन सूत्रेण तृतीया विभक्तिः ?

(अ) हेतौ (ब) येनाङ्गविकारः

(क) संज्ञोऽन्यतरस्यां कर्मणि (ड) इत्थंभूतलक्षणे

(6) ग्रामं गच्छन् तृणं स्पृशति । इत्यत्र 'ग्राम' शब्दस्य केन सूत्रेण कर्मसंज्ञा ?

(अ) अकथितं च (ब) तथायुक्तं चानीप्सितम्

(क) कर्मणि द्वितीया (ड) कर्तुरीप्सिततमं कर्म



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(7) हिमवत: गङ्गा प्रभवति। इत्यत्र केन सूत्रेण अपादानसंज्ञा भवति ?

(अ) जनिकर्तु: प्रकृति: (ब) भुव: प्रभव:

(क) आख्यातोपयोगे (ड) वारणार्थामीप्सित:

(8) अन्यस्य हेतोर्वसति। इत्यस्मिन् उदाहरणे षष्ठीविभक्ति: केन भवति ?

(अ) एनपा द्वितीया (ब) षष्ठ्यतसर्थप्रत्ययेन

(क) हेतौ (ड) षष्ठी हेतुप्रयोगे

(9) चोराद् बिभेति। इत्यत्र केन सूत्रेण पञ्चमीविभक्ति: ?

(अ) भीत्रार्थानां भयहेतु: (ब) अपादाने पञ्चमी

(क) वारणार्थामीप्सित: (ड) अन्तर्धौ येनादर्शनमिच्छति

(10) अधि: केन सूत्रेण कर्मप्रवचनीयसंज्ञक: भवति ?

(अ) यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी

(ब) विभाषा कृञि

(क) अधिरीश्वरे

(ड) अधिशीङ्स्थासां कर्म

(11) 'भाषा' शब्द: केन धातुना सञ्जात: ?

(अ) वद् (ब) भाष्

(क) भाषा (ड) भाषतु

(12) सार्थकान्वित: पदसमूह: ____ ____ कथ्यते।

(अ) शब्द: (ब) वाक्यम्

(क) वचनम् (ड) अर्थ:

(13) यदा मूलशब्दानां परस्परसम्बन्धेन वाक्यं भवति तदा स ____ ____ कथ्यते।

(अ) अभिहितान्वय: (ब) अन्विताभिधानम्

(क) आङ्काक्षा (ड) वचनम्

(14) वाक्यनिर्मितिप्रक्रियायां सार्थकता ________ , आङ्काक्षा सन्निधि च इति आवश्यकम्।

(अ) औचित्यम् (ब) योग्यता

(क) जागृति: (ड) विदग्धता

(15) पदक्रमदृष्ट्या भाषाया: ________ प्रकराणि भवन्ति।

(अ) त्रीणि (ब) द्वे

(क) पञ्च (ड) सप्त

(16) व्याकरणदृष्ट्या पदेषु सुयोग्य: सम्बन्ध: ________ कथ्यते।

(अ) पदम् (ब) अन्वय:

(क) लोप: (ड) शब्द:



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(17) यदा अर्थज्ञानार्थे आवश्यकानि सर्वाणि पदानि वाक्ये सन्ति तदा ______ भवति ।

(अ) पूर्णवाक्यात्मकं (ब) अन्तःकेन्द्रितं

(क) बहिःकेन्द्रितं (ड) स्वयंकेन्द्रितम्

(18) सर्वासां विश्वभाषाणां परिवारे विभाजनं ______ ।

(अ) पारिवारिकवर्गीकरणम् (ब) आकृतिमूलकवर्गीकरणम्

(क) ध्वनिमूलकवर्गीकरणम् (ड) शब्दमूलकवर्गीकरणम्

(19) संस्कृतभाषा किदृशी भाषा अस्ति ?

(अ) श्लिष्ट-योगात्मका (ब) प्रश्लिष्टयोगात्मका

(क) अयोगात्मका (ड) सर्वप्ययोथा: योग्या:

(20) चिनीपरिवारस्था: भाषा: ______ ।

(अ) अयोगात्मका: (ब) योगात्मका:

(क) श्लिष्टा: (ड) अश्लिष्टा:



http://www.sgbauonline.com/